
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 14/02/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 14/02/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 26/02/2012 | **First Proof Reading** | **M S Venugopal** |
| 4 | 26/02/2012 | **Started first proof Correction** | **M S Venugopal** |
| 5 | 27/02/2012 | **Finished first proof correction** | **M S Venugopal** |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVAsA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Skype Id: SRKARC6070*

*Email :* **Srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

ಮಾತೃದೇವೋ ಭವ ಪಿತೃದೇವೋ ಭವ-ಆಚಾರ್ಯದೇವೋ ಭವ

ಗ್ರಂಥಋಣ: ವ್ಯಾಸನಕೆರೆ ಪ್ರಭಂಜನಾಚಾರ್ಯರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲಗ್ರಂಥಗಳು.

# ॥ यमकभारतम् ॥

ध्यायेत् परमानन्दं यन्माता पतिमयदपरमानन्दम् ।
उज्झितपरमानं दंपत्याद्याद्याश्रमैः सदैवपरमानन्दम् ॥ 01 ॥

यस्य कराळोळं चक्रं काळः परः स हि कराळोऽळम् ।
यस्य गदा पवमानः सन् यो व्यासोऽभवत् सदापवमानः ॥ 02 ॥

यस्य रमा न मनोगं जगृहे विश्वम्भराऽपि न मनोऽगम् ।
यस्य पुमानानन्दं भुङ्क्ते यद् धाम कपतिमानानन्दम् ॥ 03 ॥

परमेषु यदा तेजः परमेषु चकार वासुदेवोऽजः ।
मानधि बिभ्रमत्सु मनो माऽनधिमाऽसीन्न वासुदेवो जः ॥ 04 ॥

सोऽजनि देवक्यन्ते यस्मादनुकम्पनावदेव क्यन्ते ।
अवदन् देव क्वं ते भुवनं हि सुराः सदैवदेऽव क्यन्ते ॥ 05 ॥

नीतो वसुदेवेन स्वततेन स गोकुळं सुवसुदेऽवे न ।
तत्र यशोदा तनयं मेने कृष्णं स्वकीयमवदातनयम् ॥ 06 ॥

ववृधे गोकुलमध्याद्यो देवो विश्वमद्भुताकुलमध्यात् ।
तत्र च पूतनिकाया वधमकरोद् यन्निजाः सुपूतनिकायाः ॥ 07 ॥

अधुनोच्छकटं ळोळी पादाङ्गुष्ठेन वातपेशशकटं ळोळी ।
अतनोद् रक्षामस्य स्वाज्ञानाद् गोपिका सदेरक्षामस्य ॥ 08 ॥

मखलाळनलोळा तन्मुखगं जगदचष्ट साळनलोळातत् ।
नाध्यैन्मायामस्य जगत् प्रभोः स्वधिकतततमायामस्य ॥ 09 ॥

तस्य सुशर्माण्यकरोदरिणो गर्गः सदुक्तिकर्माण्यकरोत् ।
अवदन्नामानमयं जगदादिं वासुदेवनामानमयम् ॥ 10 ॥

तस्य सखा बलनामा ज्येष्ठो भ्राताऽथ यन्निजाबलना मा ।
यस्य च पर्यङ्कोऽयं पूर्वतनो विष्णुमजसपर्यं कोऽयम् ॥ 11 ॥

तेन हतो वातरयस्तृणचक्रो नाम दितिसुतोऽवातरयः ।
हरमाणो वालतमं स्वात्मानं कण्ठरोधिनाऽवालतमम् ॥ 12 ॥

सोऽवनिमध्ये रङ्गन् अरिदरयुग् बालरूपमध्येरं गन् ।
अमुषन्नवनीतमदः स्वगोकुले गोपिकासु नवनीतमदः ॥ 13 ॥

तन्माता कोपमिता तमनुससाराऽत्मवादवाकोपमिता ।
जगृहे सा नमनं तं देवं तच्चिन्तयैव सानमनन्तम् ॥ 14 ॥

अथ साऽन्तरिताऽमानं विष्णुं विश्वोद्भवं तदाऽन्तरितामानम् ।
अनयद् दोमोदरतां योऽरमयत् सुन्दरीं निजामोदरताम् ॥ 15 ॥

चक्रे सोऽर्जुननाशम् प्राप्नोति च यत्स्मृतिः सदाऽर्जुनना शम् ।
तौ च गतौ निजमोकस्तेनैव नुतेन यन्निजो निजमोकः ॥ 16 ॥

अथ वृन्दावनवासं गोपाश्चक्रुर्जगत् क्षितऽवनवासम् ।

तत्र बकासुरमारः शौरिरभून्नित्यसंश्रितासुरमारः ॥ 17 ॥

अहनद् वत्सतनूकं योऽपाल्लोकं स्वयत्नवत् सतनूकम् ।

सोऽपाद् वत्सानमरः सहाग्रजो गोपवत्सवत् सानमरः ॥ 18 ॥

स विभुः श्रीमान हिके ननर्त यस्य श्रमानमा मा न हि के ।

अकरोन्नद्युदकान्तं कान्तं नीत्वोरगं स नाऽऽद्युदकान्तम् ॥ 19 ॥

हत्वा धेनुकमूढं बलात् प्रलम्बं च खेट् सधेनुकमूढम् ।

व्रजमावीदमृताशः पीत्वा वह्निं चरस्थिरादमृताशः ॥ 20 ॥

गिरिणा रक्षाऽपि कृता व्रजस्य तेन स्वरक्षरक्षापिकृता ।

शक्राय व्यञ्जयता स्वां शक्तिं विश्वमात्मनाऽव्यं जयता ॥ 21 ॥

रेमे गोपीष्वरिहा स मन्मथाक्रान्तसुन्दरीपीष्वरिहा ।

पूर्णानन्दैकतनुः स विश्वरुक्पावनोऽप्यनन्दैकतनुः ॥ 22 ॥

अथ हतयोर्गळिकेश्योः श्वफल्कजप्रापितः पुरीं गळिकेश्योः ।

भङ्क्त्वा धनुराजवरं जघान तेनैव च स्वयं राजवरम् ॥ 23 ॥

मृत्नन् गजमुग्रबलं सबलो रङ्गं विवेश सृतिमुग् रबलम् ।

हत्वा मल्लौ बलिनौ कंसं च विमोक्षितौ ततौ लौ बलिनौ ॥ 24 ॥

प्रादात् सान्दीपनये मृतपुत्रं ज्ञानदीपसन्दीपनये ।
गुर्वर्थेऽज्ञानतमःप्रभेदिता नित्यसम्भृताज्ञानतमः ॥ 25 ॥

जित्वा मागधराजं तोषितमकरोत् सदाऽऽत्मयोगधराजम् ।
अनु कुर्वन् निजसदनं चक्रे रम्यां पुरं सुबोधनुजसदनम्॥ 26 ॥

प्रसभं सगजबलस्य क्षत्रस्योच्चैः समगधराजबलस्य ।
मानं शिशुपालवरं हत्वा भैष्मीमवाप शिशुपालवरम् ॥ 27 ॥

हंसो ढिभकश्चपलावमुना संसूदितौ यवनकश्च पला ।
कीर्तिर्विमला विरता प्रतता विश्वाधिपावनीलाविरता ॥ 28 ॥

सत्याजाम्बवतीर्या भार्या विन्दाद्या भानुसाम्बवतीर्याः ।
प्रद्युम्नं मोद्रतः प्राप ज्येष्ठं हरिः सुतं मोद्रतः ॥ 29 ॥

यत्परिवारतयेशा जाता देवा नृपात्मना रतयेशाः ।
यद्धरितं विषसर्प प्रभृति ध्वान्तं न मारुतिं विषसर्प ॥ 30 ॥

येन हिडिम्बबकाद्या रक्षोधीशा निपातिता बबकाद्याः ।
भीमे प्रीतिममेयां व्यञ्जयता तेन शेषपाति ममे याम् ॥ 31 ॥

अथ कृष्णावरेणे तान् प्राप्तान् राज्ञोऽश्रृणोत् सदावरणेतान् ।
द्रष्टुं यातः सबलस्तां चानैषीत् पृथासुतांस्ततः सबलः ॥ 32 ॥

तानिन्द्रस्थलवासांश्चक्रे कृष्णः परो निजस्थलवासान् ।
स्वबलोद्रेचितमानैर्जुगोप धर्मं च तैः पराचितमानैः ॥ 33 ॥

वालिवधानुनयाय प्रणयी सख्यं सुसन्दधे नु नयाय ।
वासवजेन विशेषात् तेनैव पुनर्नृजन्मजेन विशेषात् ॥ 34 ॥

मातुः परिभवहान्यै राज्ञा द्युसदामितश्च परिभवहाऽन्यैः ।
अभवन्नरकमुरारिर्योऽवासीदत् समस्तनरकमुरारिः ॥ 35 ॥

नीतो दिवि देववरै रेमे सत्यासमन्वितोऽदेववरैः ।
सर्वतुर्वने शशिना निशि सत्यां वासरे वनेऽशशिना ॥ 36 ॥

सुरतरुमापाऽळिमतात् प्रकाशयन् शक्तिमात्मनः पाळिमतात् ।
सुरवरवीरेषु दरी प्रधानजीवेश्वरः परेषुदरी ॥ 37 ॥

पुरमभिययारिदरी दत्वा भद्रां पृथासुतायारिदरी ।
शक्रपुरीमभियातः प्रादाद् वह्नेर्वनं सतामभियाऽतः ॥ 38 ॥

शिवभक्तप्रवराद्यं पुमान् न सेहे गिरीशविप्रवराद् यम् ।
तं स्वात्मेन्द्रवरेण व्यधुनोद् भीमेन धूतरुद्रवरेण ॥ 39 ॥

यस्याऽज्ञाबलसारैः पार्थैर्दिग्भ्यो हृतं धनं बलसारैः ।
जित्वा क्ष्मामविशेषां प्रसह्य भूपान् समस्तकामविशेषाम् ॥ 40 ॥

अथ पार्थान् क्रतुराजं प्रापयन्नरेट् सरुद्रशक्रतुराजम् ।
पूजा तेनावापि च्छिन्नैश्चैद्यः सृतिं गते नावाऽपि ॥ 41 ॥

निहतौ सौभकरोशौ शीतो भातश्च येन तौ भकरूशौ ।
अजयद् रुद्रं च रणे बाणार्थेऽवनतिपतितकचन्द्रं चरणे ॥ 42 ॥

असृजज्ज्वरमुग्रतमः क्षयप्रदो लीलयाऽधिवरमुग् रतमः ।
क्रीडामात्रं विश्वं प्रकाशयन्नात्मनः स विहरकमात्रं विश्वम् ॥ 43 ॥

यस्याऽवेशोरुबलान्न्यहनत् पार्थोऽसुरान् प्रजेशोरुबलात् ।
वरदानादस्यैव जगत् प्रभोरीरणात् समनुगतनादस्यैव ॥ 44 ॥

यस्याऽवेशात् स बलः प्रचकर्ष पुरं प्रसह्य वेशात् सबलः ।
कुरुपतिनाम नु यमुना कृष्णा येनाऽहुरह्यमतनु यमुना॥45॥

यद्बलवान् क्रोधवाशान्निनाय नाशं वृकोदरः क्रोधवशान् ।
लेभेऽजान्यागम्यं स्थानं पुष्पाणि धाम चान्यागम्यम् ॥ 46 ॥

यद्बलभारवहत्वान्नाचलदुरगादिभिः सुभारवहत्वात् ।
धर्मादिरिहाऽपि पदं भीमो येनैव साहसं लिहाऽऽपि पदम्॥ 47 ॥

न हि नहुषोऽलं नहितुं धर्मो द्रौणिस्तथेतरेऽलं नहितुम् ।
नो राट् कर्णौ ब्रह्मवरी येन ध्वस्तोऽस्त्रमग्रहीत् सुब्रह्मवरी॥ 48 ॥

क्षात्रं धर्मं स्ववता गुरुवृत्त्यै केशवाज्ञया च मं स्ववता ।
सर्वं सेहे मनसा भीमेनेशैकमानिना हेमनसा ॥ 49 ॥

यद्भक्तप्रवरेण प्रोतः स्वस्मिन् स कीचकः प्रवरेण ।
पतितास्तस्य सहायाः कृष्णार्थे मानिनः समस्य सहायाः ॥ 50 ॥

यद्भक्त्याऽनुगृहीतौ पार्थौ भीमश्च गोनृपौ नु गृहीतौ ।
ऋणमुक्त्यै सुव्यत्यस्त्यै क्रमशो वीरावमुञ्चतां सुव्यत्यस्त्यै ॥ 51 ॥

यद्भक्त्याऽमितयाऽलं कृष्णा कार्ये विवेश कृष्णाकार्ये ।
यामीरार्द्धतनुत्वान्नाऽपाऽद् भीमाद्दतेऽपि नाऽपाद् भीमात् ॥ 52 ॥

यां स्प्रष्टुमिच्छन्तमजातशत्रुं न्यवारयत् स्वस्थमजातशत्रुम् ।
शंरूपाने नित्यरतेरियं श्रीरिति स्म देवेड् यदितेरियं श्रीः ॥ 53 ॥

मनसामनसाऽमनसा मनसा यमनुन्तमजस्त्रमवेदनुया ।
विलयं विलयं विलयं विलयन्निखिलं त्वशुभं प्रचकार च यः ॥ 54 ॥

सोऽगाद् दूतमुखेन प्रभुणेदं वर्तते यदूतमुखेन ।
पार्थार्थे बहुतनुतां यत्र प्राकाशयत् स्वयं सवहुतनुताम् ॥ 55 ॥

गुरुकर्णनदीजादीनवधीच्चक्षुर्बलेन जनदीजादी ।
शक्त्या निजया परवान् स्वचनानुद्रेचयन्ननन्तयाऽपरवान् ॥ 56 ॥

यस्य सुनीतिसहायान्न रिपून् मेनेऽर्जुनः समेतसहा यान् ।
अकरोच्चाऽसु परासुप्रततिं सेनासु धावनासुपरासु ॥ 57 ॥

येन जयद्रथमारः पार्थः शत्रूनवापतद् रथमारः ।
यद्विरहादपि देहे स रथः शश्वत् स्थितेः सदादपि देहे ॥ 58 ॥

यद्धरितो भरताभः प्रभुरम्भाभावितोऽभिभरताभः ।
भीमो रभसाऽभिभवी प्रसभं भा भाभिभूर्भसा भिभवी ॥ 59 ॥

यदनुग्रहिपूर्णत्वाद् भीमः सर्वानरीननहिपूर्णत्वाऽऽत् ।
अदहद् बाहुबलेन क्रोधाग्नावाहितान् निजाहुबलेन ॥ 60 ॥

कृष्णाभीमाप्ततमः शीर्णं येन स्वकीयहृदयमाप्ततमः ।
धृतराष्ट्रसुतानवधीद् भीमेन स्थापितो मनसि सुसुतानवधीत् ॥ 61 ॥

भीमविपाटितदेहानदर्शयत् स्वानरीन् विपाटितदेहान् ।
कृष्णाया हितकारी सम्यग्गीरप्रियः सदाऽहितकारी ॥ 62 ॥

अथ हरिणा पीतबलं द्रौणेरस्त्रं महारिणाऽपीतबलम् ।
दधता वासोमरणं नीतं चक्रेऽभिमन्युजं सोमरणम् ॥ 63 ॥

तस्य च रक्षा सुकृता जनार्दनेनेशशेषकेक्षासुकृता ।
पार्थेषु प्रेमवता नित्यं भर्त्राऽसुतासुविप्रेमवता ॥ 64 ॥

ज्ञानं परमं प्रादाद् भीष्मगतः सृतिविमोक्षचरमं प्रादात् ।

पाण्डुसुतानामधिकं चक्रे वेदं गुणोत्तरं स्वनामधिकम् ॥ 65 ॥

तेनावापि सुजातैर्हरिमेधस्तुरगवर्तनेऽपि सुजातैः ।

पाण्डुसुतैः सवसूक्तैराप्तैर्व्यासात्मना च सुसवसूक्तैः ॥ 66 ॥

तदनु स पाण्डुतनूजै रेमे क्ष्मां पालयन् सुपाण्डुतनूजैः ।

अनुपमसुखरूपोऽजः परमः श्रीवल्लभः सति स्वरूपो जः । 67 ॥

सुगतिं चरमामददान्निचयोग्यां ज्ञानिसुततिपरमामददात् ।

पार्थानां सयदूनां स पितृप्रेष्यादिनामिनां सयदूनाम्॥68 ॥

रेमे तत्रापिसुखी परमोऽनन्तो ननन्द तत्रापि सुखी ।

प्राणेनेन्दिरया च प्रयुतो नित्यं महागुणेन्दिरया च ॥ 69 ॥

एवं सर्वाणि हरे रूपाणि श्रीपतेः सुपर्वाणिहरेः ।

पूर्णसुखानि सुभान्ति प्रततानि निरन्तराणि निसुभान्ति ॥ 70 ॥

राम राम महाबाहो माया ते सुदुरासदा ।

वाद सादद को लोके पादावेव तवाऽसजेत् ॥ 71 ॥

[जेत् सवातव वेदा वेदापाऽके लोकोदद सादवा।

दासरादुसुतेयामाहोवाहा मम राम रा ]

देवानां पतयो नित्यं नो मतं यस्य जानते ।
तस्मै देव नमस्येऽहं भवतेऽसुरमारये ॥ 72 ॥

समस्तदेवजनकवासुदेवपरामृत ।
वासुदेव परामृत ज्ञानमूर्ते नमोऽस्तुते ॥ 73 ॥

देवादे देवलोकप पूर्णानन्दमहोदधे ।
सर्वज्ञेश रमानाथ देवाऽदेऽदेऽव लोकप ॥ 74 ॥

यो निर्ममेऽशेषपुराणविद्यां यो निर्ममेशे षपुराणविद्यऽम् ।
यो निर्ममेशेषपुराऽणविद् द्यां योऽनिर्ममेऽशेषपुराणविद् याम् ॥ 75 ॥

अनन्तपारामितविक्रमेश प्रभो रमापारमनन्तपार ।
महागुणाढ्यापरिमेयसत्त्व रमालयाशेषमहाऽगुणाढ्य ॥ 76 ॥

भा भा भा भा भा भा भा भा भा भा भा भा भा भा
भा भा भा भा भा भा भा भा भा भा भा भा भा भा ॥ 77 ॥

नैव परः केशवतः परमादस्मात् समश्च सुकेशवतः ।
सोऽयं शपथवरो नः शश्वत् सन्धारितः सुशपथवरोऽनः ॥ 78 ॥

कृष्णकथेयं यमिता सुशतीर्थेनोदिताऽनने यं यमिता ।
भक्तिमता परमेशे सर्वोद्रिका सदानुताऽऽप रमेशे ॥ 79 ॥

इति नारायणनामाऽव कतीर्थं पूजितः सुरायणना मा ।
पूर्णं गुणैर्धिक पूर्णं ज्ञानेच्छाभक्तिभिः स्वधिकपूर्णं ॥ 80 ॥

## ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं महाभारततात्पर्यं सम्पूर्णम् ॥

॥ श्री कृष्णार्पणमस्तु ॥

॥ मुख्यप्राणवशेसर्वं स विष्णोर्वशगः सदा ॥

॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥